स्थावरतां नरः" मनुः। २कर्म्मजन्ये पापादौ "मनोवाग्देहजैर्नित्यं कर्मदोषैर्न लिप्यते" मनुः। "कर्मदोषैः पापैः" कुल्लू०। विहिताकरणाविहिताचरणरूपे २कर्मविषयदोषे च। "अवेक्षेत गतीर्नृणां कर्मदोषसमुद्भवाः" मनुः। "विहिताकरणाविहिताचरणरूपकर्मदोषजन्या गतीः" कुल्लू०। ६सकलकर्महेतौ मिथ्याज्ञानजन्यवासनारूपे दोषे च। "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानाम्" इत्यादि० गौत०सू० मिथ्याज्ञानजन्यवासनारूपदोषस्य सकलप्रवृत्तिरूपकर्म्महेतुत्वोक्तेस्तस्य तथात्वम्।

**कर्म्मधारय** पु० व्याकरणोक्ते समानाधिकरणपदघटिते सामासाधीनलक्षणान्यूने समासभेदे "समानाधिकरणस्तत्पुरुषः कर्मधारयः" पा०। तल्लक्षणादिकं शब्द०प्र०उक्तं यथा

"क्रमिकं यन्नामयुगमेकार्थेऽन्यार्थबोधकम्। तादात्म्येन, भवेदेष समासः कर्मधारयः। क्रमिकं यन्नामद्वयं तयोरेकस्य नाम्नोऽर्थे धर्म्मिणि तादात्म्येनापरनाम्नोऽर्थस्यान्वयबोधं प्रति समर्थं तादृशं नामद्वयं कर्मधारयः नीलोत्पलमित्यादावुत्पलादिपदस्यार्थे नीलादिपदार्थस्य तादात्म्येनान्वयः, तथा पुरुषसिंह इत्यादावपि पुरुषादावुत्तरपदलभ्यस्य सिंहादिसदृशस्य पुरुषः सिंह इवेत्यादिविग्रहे प्रायेणोपमेयस्योपमानैरिति कर्मधारयानुशासनात्। कुम्भस्य समीपमित्याद्यर्थकस्य उपकुम्भादेर्न तादात्म्येनान्वयबोधकः, प्रबलमपद्रव्यमित्यादेः संग्रहाय नामपदस्य धातुभिन्नोपलक्षकत्वात् सार्थकसामान्यपरत्वेऽपि क्षत्यभावाच्च। नीलमुत्पलमित्यादौ तु समानविभक्तिकं नामद्वयं स्वार्थयोरभेदान्वयं बोधयदपि न क्रमिकं विभक्त्याव्यवधानात्। यदि च तादात्म्येन नीलादिनामार्थस्यान्वयबुद्धौ नीलादिनामोत्तरनामोपस्थाप्यत्वं तन्त्रमतोन तत्राभेदसम्बन्धेन नीलादेरन्वयः, परन्तु विशेषणविभक्त्युपस्थापिते तादात्म्यएवाधेयत्वेन, नीलघटपटावित्यादौ च नीलपदाव्यवहितेन घटपटेत्येवंद्वन्द्वात्मकनाम्नैवोपस्थापिते घटे पटे च नीलस्य तादात्म्येनान्वयान्न व्यभिचारः। स्तोकं पचति धान्येन धनं, प्रकृत्या पटुरित्यादावपि स्तोकादेर्न धात्वाद्यर्थे तादात्म्येनान्वयः किन्तु द्वितीयाद्यर्थे तादात्म्यएवाधेयत्वेनेत्यादिकं विभाव्यते तदा क्रमिकत्वमनुपादेयमेव। राजपुरुष इत्यादिकस्तु तत्पुरुषोन पूर्वपदलक्षितराजसम्बन्धिनस्तादात्म्येनान्वयबोधकसमासविग्रहयोस्तुल्यार्थकत्वहान्यापत्तेः, परन्तु राजसम्बन्धस्यैव। अतएव राजपुरुषइत्यादौ पूर्वपदे षष्ठ्यर्थसम्बन्धे लक्षणेति मणिकृदुक्तमपि सङ्गच्छते। यथा च नामार्थयोर्भेदेनान्वयेऽपि न क्षतिस्तथोपरिष्टाद्वक्ष्यते। किञ्चिद्विशिष्टसुबर्थानवच्छिन्नस्यैव वा तादात्म्येनान्वयबोधकत्वमुक्तनिरुक्तौ निवेश्यम्। नचैवमपि पञ्चपुल्यादिद्विगौ द्विगव्यं गच्छत इत्यादिस्थलीये द्वितयाद्यभिन्नगव्यादिबोधकाव्ययीभावे चातिव्याप्तिस्तदन्यत्वेनापि विशेषणीयत्वात्। अत्र च मानुषब्राह्मणो ब्राह्मणमानुष इत्याद्यप्रयोगाद्विशेषणविशेष्ययोर्यत्र मिथस्तादात्म्येन व्यभिचारस्तत्रैव कर्मधारयः साधुः प्रमेयधूमइत्यादौ तु नरस्य शरीरं राहोः शिर इत्यादाविव तादात्म्यसम्बन्धार्थकषष्ठ्या तत्पुरुषएवेति वृद्धाः। चन्दनतरुर्विन्ध्यगिरिर्वसन्तसमय इत्यादिप्रयोगस्य प्रामाणिकत्वात् विशेष्यस्यैव विशेषणव्यभिचारित्वं कर्मधारये तन्त्रं न तु विशेषणस्यापि तद्व्यभिचारित्वम्। पुरुषोत्तम इत्यत्र चोत्तमत्वं न नित्यज्ञानादिमत्त्वं किन्तु भ्रमविधुरत्वम्। अतएव तत्र पुरुषस्येव, पुरुषेऽपि तस्य व्यभिचारसत्त्वादुत्तमपुरुष इत्यपि कर्मधारयः साधुरिति तु नव्याः। तदाद्युत्तरपदकः कर्मधारयः प्रायशोनेष्यते नीलतद्धस्तीत्यादितोजात्वपि नीलोत्पलादेरस्तित्वाद्यप्रतीतेः। "पक्वयद्भोजनं रम्यमामतद्भुञ्जनं यथा। नीलयद्रसमास्वाद्यः कटुतद्रूपमीष्यते" इत्यादिप्रयोगात् क्वचिदिष्यतेऽपि। प्रयुक्तञ्च जुमरनन्दिना परमः स इत्याद्यर्थे परमसः परमतावित्यादि। तत्पुरुषोऽप्येतेन व्याख्यातः। ननु विशेष्यतया नामार्थप्रकारकान्वयबुद्धिमात्रं प्रत्येव नामोत्तरविभक्त्युपस्थाप्यत्वं तन्त्रं नतु तादात्म्यसम्बन्धानवच्छिन्नतत्प्रकारताकबुद्धिं प्रति गौरवादतोनामार्थयोर्नीलोत्पलयोरन्वयासम्भवात् कर्मधारयादिकः समासोन यौगिकः किन्तु नीलोत्पलत्वादिविशिष्टे रूढएव तदुक्तं भर्त्तृहरिणा "अबुधान् प्रत्युपायाश्च विहिताः प्रतिपत्तये। शब्दान्तरत्वादत्यन्तं भेदोवाक्यसमासयोः" इति वैयाकरणाः, तन्मन्दं नीलोत्पलमित्यादौ समुदाये रूढ्यप्रतिसन्धानेऽपि नीलादिप्रत्येकपदोपस्थित्या तयोस्तादात्म्येनान्वयबोधस्यानुभविकत्वेन गौरवस्य प्रामाणिकत्वादन्यथा नामार्थस्यान्वयबोधसामान्यं प्रत्येव नामोत्तरनामोपस्थाप्यत्वं तन्त्रमुरीकृत्य नीलमानयेत्यादौ नामार्थसुबर्थयोर्नान्वयबोधः, परन्तु सुबन्तभागस्य नीलविशिष्टकर्मत्वादौ रूढिरेवेत्यत्रापि किन्न रोचयेः?। नच समासस्याशक्तत्वे नीलोद्रव्यञ्च घट इत्यादाविव नीलघटोद्रव्यमित्यादावपि घटे धर्म्मिण्येकत्र द्वयमिति न्यायेन नीलद्रव्ययोस्तादात्म्येनान्वयापत्तिरिति वाच्यम्,